শ্রীঃ
শ্রীমতে রামানুজায নমঃ
শ্রীমতে নিগমান্তমহাদেশিকায নমঃ
শ্রীসীতালক্ষ্মণভরতশত্রুঘ্নহনুমৎসমেত শ্রীরামচন্দ্র পরব্রহ্মণে নমঃ

শ্রীমদ্রামাযণে ৱাল্মীকীযে আদিকাৱ্যে বালকাণ্ডে

# ॥ সপ্তত্রিংশঃ সর্গঃ ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness  śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীসীতালক্ষ্মণভরতশত্রুঘ্নহনুমৎসমেত শ্রীরামচন্দ্র পরব্রহ্মণে নমঃ

# ॥ সপ্তত্রিংশঃ সর্গঃ ॥

## গঙ্গাযাঃ কার্তিকেযস্যোৎপত্তেঃ প্রসঙ্গঃ

তপ্যমানে তদা দেৱে সেন্দ্রাঃ সাগ্নিপুরোগমাঃ।
সেনাপতিমভীপ্সন্তঃ পিতামহমুপাগমন্॥ **1.37.1** ॥

ততোঽব্রুৱন্ সুরাঃ সর্ৱে ভগৱন্তং পিতামহম্।
প্রণিপত্য সুরারাম সেন্দ্রাঃ সাগ্নিপুরোগমাঃ॥ **1.37.2** ॥

যেন সেনাপতির্দেৱ দত্তো ভগৱতা পুরা।
স তপঃ পরমাস্থায তপ্যতে স্ম সহোমযা॥ **1.37.3** ॥

যদত্রানন্তরং কার্যং লোকানাং হিতকাম্যযা।
সংৱিধৎস্ৱ ৱিধানজ্ঞ ৎৱং হি নঃ পরমা গতিঃ॥ **1.37.4** ॥

দেৱতানাং ৱচঃ শ্রুৎৱা সর্ৱলোকপিতামহঃ।
সান্ত্ৱযন্ মধুরৈর্ৱাক্যৈস্ত্রিদশানিদমব্রৱীৎ॥ **1.37.5** ॥

শৈলপুত্র্যা যদুক্তং তন্ন প্রজাঃ স্ৱাসু পত্নিষু।
তস্যা ৱচনমক্লিষ্টং সত্যমেৱ ন সংশযঃ॥ **1.37.6** ॥

ইযমাকাশগঙ্গা চ যস্যাং পুত্রং হুতাশনঃ।
জনযিষ্যতি দেৱানাং সেনাপতিমরিন্দমম্॥ **1.37.7** ॥

জ্যেষ্ঠা শৈলেন্দ্রদুহিতা মানযিষ্যতি তং সুতম্।
উমাযাস্তদ্বহুমতং ভৱিষ্যতি ন সংশযঃ॥ **1.37.8**॥

তচ্ছ্রুৎৱা ৱচনং তস্য কৃতার্থা রঘুনন্দন।
প্রণিপত্য সুরাঃ সর্ৱে পিতামহমপূজযন্॥ **1.37.9**॥

তে গৎৱা পরমং রাম কৈলাসং ধাতুমণ্ডিতম্।
অগ্নিং নিযোজযামাসুঃ পুত্রার্থং সর্ৱদেৱতাঃ॥ **1.37.10**॥

দেৱকার্যমিদং দেৱ সমাধৎস্ৱ হুতাশন।
শৈলপুত্র্যাং মহাতেজো গঙ্গাযাং তেজ উৎসৃজ॥ **1.37.11**॥

দেৱতানাং প্রতিজ্ঞায গঙ্গামভ্যেত্য পাৱকঃ।
গর্ভং ধারয ৱৈ দেৱি দেৱতানামিদং প্রিযম্॥ **1.37.12**॥

ইত্যেতদ্ ৱচনং শ্রুৎৱা দিৱ্যং রূপমধারযৎ।
স তস্যা মহিমাং দৃষ্টৱা সমন্তাদৱশীর্যত॥ **1.37.13**॥

সমন্ততস্তদা দেৱীমভ্যষিঞ্চত পাৱকঃ।
সর্ৱস্রোতাংসি পূর্ণানি গঙ্গাযা রঘুনন্দন॥ **1.37.14**॥

তমুৱাচ ততো গঙ্গা সর্ৱদেৱপুরোগমম্।
অশক্তা ধারণে দেৱ তেজস্তৱ সমুদ্ধতম্॥ **1.37.15**॥

দহ্যমানাগ্নিনা তেন সম্প্রৱ্যথিতচেতনা।
অথাব্রৱীদিদং গঙ্গাং সর্ৱদেৱহুতাশনঃ॥ **1.37.16**॥

ইহ হৈমৱতে পার্শ্ৱে গর্ভোঽযং সন্নিৱেশ্যতাম্।
শ্রুৎৱা ৎৱগ্নিৱচো গঙ্গা তং গর্ভমতিভাস্ৱরম্॥ **1.37.17**॥

উৎসসর্জ মহাতেজাঃ স্রোতোভ্যো হি তদানঘ।
যদস্যা নির্গতং তস্মাৎ তপ্তজাম্বূনদপ্রভম্॥ **1.37.18**॥

কাঞ্চনং ধরণীং প্রাপ্তং হিরণ্যমতুলপ্রভম্।
তাম্রং কার্ষ্ণাযসং চৈৱ তৈক্ষ্ণ্যাদেৱাভিজাযত॥ **1.37.19**॥

মলং তস্যাভৱৎ তত্র ত্রপু সীসকমেৱ চ।
তদেতদ্ধরণীং প্রাপ্য নানাধাতুরৱর্ধত॥ **1.37.20**॥

নিক্ষিপ্তমাত্রে গর্ভে তু তেজোভিরভিরঞ্জিতম্।
সর্ৱং পর্ৱতসন্নদ্ধং সৌৱর্ণমভৱদ্ ৱনম্॥ **1.37.21**॥

জাতরূপমিতি খ্যাতং তদাপ্রভৃতি রাঘৱ।
সুৱর্ণং পুরুষৱ্যাঘ্র হুতাশনসমপ্রভম্।
তৃণৱৃক্ষলতাগুল্মং সর্ৱং ভৱতি কাঞ্চনম্॥ **1.37.22**॥

তং কুমারং ততো জাতং সেন্দ্রাঃ সহ মরুদ্গণাঃ।
ক্ষীরসম্ভাৱনার্থায কৃত্তিকাঃ সমযোজযন্॥ **1.37.23**॥

তাঃ ক্ষীরং জাতমাত্রস্য কৃৎৱা সমযমুত্তমম্।
দদুঃ পুত্রোঽযমস্মাকং সর্ৱাসামিতি নিশ্চিতাঃ॥ **1.37.24**॥

ততস্তু দেৱতাঃ সর্ৱাঃ কার্তিকেয ইতি ব্রুৱন্।
পুত্রস্ত্রৈলোক্যৱিখ্যাতো ভৱিষ্যতি ন সংশযঃ॥ **1.37.25**॥

তেষাং তদ্ ৱচনং শ্রুৎৱা স্কন্নং গর্ভপরিস্রৱে।
স্নাপযন্ পরযা লক্ষ্ম্যা দীপ্যমানং যথানলম্॥ **1.37.26**॥

স্কন্দ ইত্যব্রুৱন্ দেৱাঃ স্কন্নং গর্ভপরিস্রৱে।
কার্তিকেযং মহাবাহুং কাকুৎস্থ জ্ৱলনোপমম্॥ **1.37.27**॥

প্রাদুর্ভূতং ততঃ ক্ষীরং কৃত্তিকানামনুত্তমম্।
ষণ্ণাং ষডাননো ভূৎৱা জগ্রাহ স্তনজং পযঃ॥ **1.37.28**॥

গৃহীৎৱা ক্ষীরমেকাহ্না সুকুমারৱপুস্তদা।
অজযৎ স্বেন ৱীর্যেণ দৈত্যসৈন্যগণান্ ৱিভুঃ ॥ **1.37.29** ॥

সুরসেনাগণপতিমভ্যষিঞ্চন্মহাদ্যুতিম্।
ততস্তমমরাঃ সর্ৱে সমেত্যাগ্নিপুরোগমাঃ ॥ **1.37.30** ॥

এষ তে রাম গঙ্গাযা ৱিস্তরোঽভিহিতো মযা।
কুমারসম্ভৱশ্চৈৱ ধন্যঃ পুণ্যস্তথৈৱ চ ॥ **1.37.31** ॥

ভক্তশ্চ যঃ কার্তিকেযে কাকুৎস্থ ভুৱি মানৱঃ।
আযুষ্মান্ পুত্রপৌত্রৈশ্চ স্কন্দসালোক্যতাং ৱ্রজেৎ ॥ **1.37.32** ॥

॥ ইত্যার্ষে শ্রীমদ্রামাযণে ৱাল্মীকীযে আদিকাৱ্যে বালকাণ্ডে সপ্তত্রিংশঃ সর্গঃ ॥